श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये एकोननवतितमं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये एकोननवतितमं दशकम् ॥

## वृकासुरवधवर्णनम्

रमाजाने जाने यदिह तव भक्तेषु विभवो
 न सद्यस्सम्पद्यस्तदिह मदकृत्त्वादशमिनाम्।
प्रशान्तिं कृत्वैव प्रदिशसि ततः काममखिलं
 प्रशान्तेषु क्षिप्रं न खलु भवदीये च्युतिकथा ॥ **89.1** ॥

सद्यः प्रसादरुषितान् विधिशङ्करादीन्
 केचिद्विभो निजगुणानुगुणं भजन्तः।
भ्रष्टा भवन्ति बत कष्टमदीर्घदृष्ट्या
 स्पष्टं वृकासुर उदाहरणं किलास्मिन् ॥ **89.2** ॥

शकुनिजः स तु नारदमेकदा
 त्वरिततोषमपृच्छदधीश्वरम्।
स च दिदेश गिरीशमुपासितुं
 न तु भवन्तमबन्धुमसाधुषु ॥ **89.3** ॥

तपस्तप्त्वा घोरं स खलु कुपितः सप्तमदिने
 शिरः छित्वा सद्यः पुरहरमुपस्थाप्य पुरतः।
अतिक्षुद्रं रौद्रं शिरसि करदानेन निधनं
 जगन्नाथाद्वव्रे भवति विमुखानां क्व शुभधीः ॥ **89.4** ॥

मोक्तारं बन्धमुक्तो हरिणपतिरिव प्राद्रवत्सोऽथ रुद्रं
 दैत्याद्भीत्या स्म देवो दिशि दिशि वलते पृष्ठतो दत्तदृष्टिः।

तूष्णीके सर्वलोके तव पदमधिरोक्ष्यन्तमुद्वीक्ष्य शर्वं
    दूरादेवाग्रतस्त्वं पटुवटुवपुषा तस्थिषे दानवाय ॥ **89.5** ॥

भद्रं ते शाकुनेय भ्रमसि किमधुना त्वं पिशाचस्य वाचा
    सन्देहश्चेन्मदुक्तौ तव किमु न करोष्यङ्गुलीमङ्ग मौलौ ।
इत्थं त्वद्वाक्यमूढः शिरसि कृतकरः सोऽपतच्छिन्नपातं
    भ्रंशो ह्येवं परोपासितुरपि च गतिः शूलिनोऽपि त्वमेव ॥ **89.6** ॥

भृगुं किल सरस्वतीनिकटवासिनस्तापसा -
    स्त्रिमूर्तिषु समादिशन्नधिकसत्त्वतां वेदितुम् ।
अयं पुनरनादरादुदितरुद्धरोषे विधौ
    हरेऽपि च जिहिंसिषौ गिरिजया धृते त्वामगात् ॥ **89.7** ॥

सुप्तं रमाङ्कभुवि पङ्कजलोचनं त्वां
    विप्रे विनिघ्नति पदेन मुदोत्थितस्त्वम् ।
सर्वं क्षमस्व मुनिवर्य भवेत् सदा मे
    त्वत्पादचिह्नमिह भूषणमित्यवादीः ॥ **89.8** ॥

निश्चित्य ते च सुदृढं त्वयि बद्धभावाः
    सारस्वता मुनिवरा दधिरे विमोक्षम् ।
त्वामेवमच्युत पुनश्च्युतिदोषहीनं
    सत्त्वोच्चयैकतनुमेव वयं भजामः ॥ **89.9** ॥

जगत्सृष्ट्यादौ त्वां निगमनिवहैर्वन्दिभिरिव
    स्तुतं विष्णो सच्चित्परमरसनिर्द्वैतवपुषम् ।
परात्मानं भूमन् पशुपवनिताभाग्यनिवहं
    परीतापश्रान्त्यै पवनपुरवासिन् परिभजे ॥ **89.10** ॥

॥ इति श्रीमन्नारायणीये एकोननवतितमं दशकं समाप्तम् ॥